श्रीगणेशायनमः॥अथयोगिनःकृत्याकृत्यनिर्णयः॥सम्यगाराधितसद्गु
रुप्रसादासादितसरहस्यसांगोपांगयोगा निरंतराभ्यसनशीलोयथोक्तफल
माप्नोत्यवपुराण॥आचार्याद्योगसर्वस्वमप्यस्थिधीःस्वयंयथोक्तंलभतेतेन
प्राप्नोत्यपिचनिर्वृतिमिति।सुरेश्वराचार्यः।गुरुप्रसादाल्लभतेयोगमष्टांगसं
युतं॥शिवप्रसादाल्लभतेयोगसिद्धिंचशाश्वती॥मिति।श्रुतिश्च।यस्यदेवपरा
भक्तिर्यथादेवतथागुरौ॥तस्यैतेकथिताह्यर्थाप्रकाशंतेमहात्मनः॥आचार्यवा
नपुरुषोवेदेति॥योगबीज॥मरुज्जयोयस्यसिद्ध्यस्तंसेवेतगुरुंसदा।गुरुंवि
प्रसादेनकुर्यात्प्राणजयंबुधः॥याज्ञवल्क्यः॥गुरवःपंचसर्वेषांचतुर्णंश्रुतिचोदि
ताः॥मातापितातथाचार्यामातुलःश्वशुरस्तथा॥एषांमुख्याःयःप्रोक्तआचार्यः
पितरौतथा॥एषांमुख्यतमस्त्वेकस्त्वाचार्यःपरमात्मवित्॥तस्मात्सर्वेषुकाल
षुसर्वनिश्चयसार्थिभिः॥गुरवःश्रुतिसंपन्नाःपूज्याश्चाभ्यर्चनादिभिः॥इति॥राजयो
ग॥वेदांततत्कांक्षिभिरागमैश्चनानाविधैःशास्त्रकदंबकैश्च।ध्यानादिभिःस
त्करणैर्नगम्यश्चैतामणिंह्येकगुरुंविहाय॥दृष्टःस्थिरायस्यविनैवदृश्यंवायुः

स्थिरायस्यविनाप्रयत्नं॥चित्तंस्थिरंयस्यविनावलंबंसएवयोगीसगुरुःससेव्यः॥गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः॥गुरुरेवात्परंनास्तितस्मात्तंपूजयेत्सदा॥गुरुणादर्शितंतत्वंतत्क्षणात्तन्मयोभवेत्।मत्वाविमुक्तंचात्मानंमुच्यतेनात्रसंशयः॥यथाक्षुद्ररसस्पर्शात्ताम्रंभवतिकांचनं॥गुरुपदेशश्रवणाच्छिष्यस्त्वमयस्तथा॥नकेवलंगुरूपदेशमात्रादेवसिद्धिः स्वस्यैवपरिश्रमादेवसर्वं सर्वमवाप्नोति॥हठप्रदीपिकायां॥श्रुतप्रतीतिःस्वगुरुप्रतीतिस्वात्मप्रतीतिर्मनसोनिरोधः।एतानिसर्वाणिसमुच्चितानिमतानिनिर्धीरहइंधनानि।वासिष्ठ॥ उपदेशात्कुमारामव्यवस्थामात्रपालनं।क्षत्रस्तुकारणंश्रुत्वाशिष्यप्रज्ञैवकेवलं॥ चिनिवारितसर्वार्थादपहस्तितबंधनात्।नस्वधर्म्याद्दृतकाश्चिदभ्युद्धरतिसंकटात्॥वैराग्यंणाथशास्त्रेणमहत्वादिगुणैरपि।यत्नेहिधार्यतेस्वमेवोल्लासयेन्मनः॥ ततस्त्रिभुवनैश्वर्यान्नकोशाद्वनधारिणः।फलमासाद्यतेचित्तंघनंतापहरंहितं॥ राजयोग॥तस्मादुपासीतसम्यक्सहजंप्राप्यसद्गुरोः।अनायासेनसततमात्मा भ्यासरताभवेत्॥नित्याभ्यसनशीलस्यस्वसंवेद्यंहितंस्वतः।इदंतदितिहस्त

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

गुरुणापिनशक्यते ॥ वाङ्मनःकायसंभोगंसंप्रयत्नेनवर्जयेत् । ब्रह्माहमस्मीति द्वि० प० २
त्यात्मानंसुस्थिरंधारयेत्सदा ॥ हठप्रदीपिकायां ॥ वर्जयेद्दुर्जनप्रीतिंवन्हिस्त्री
पथसेवनं । प्रातस्नानोपवासादिकायक्लेशादिकंतथा ॥ अत्याहारःप्रयासश्चप्रज
ल्पानियमग्रहः । जनसंगश्चलोल्यंचषड्भिर्योगःप्रणश्यति ॥ उत्साहात्साहसात्धै
र्यात्तत्वज्ञानाद्विनिश्चयात् । जनसंगपरित्यागात्षड्भिर्योगःप्रसिध्यति ॥ लिंगपुरा
ण ॥ तप्तांगारसमानारीघृतपिंडसमःपुमान् । तस्मान्नारीषुसंसर्गंप्रयत्नेनवि
वर्जयेदिति ॥ नारीसंगवर्जनवत्महाविघ्नभूतांधूर्तगोष्ठींचप्रयत्नेनविवर्जयेत् ॥
धूर्तस्वरूपंतुप्रयागतत्वप्रकाशेदत्तात्रेयेणोक्तंतथाहि ॥ मुंडितादंडधारीवाकषा
यवसनोपिवा । नारायणवचोवादीज्ञानलिंगसमन्वितः ॥ नमःशिवायवाक्योवा
स्वाचारपरिपूजकः । स्नानद्वादशपुंड्रोवामालाबाहुत्यभूषितः ॥ क्रीयाहीनोवा
कुक्कुरःकर्मसिद्धिमवाप्नुयात् । नवेषधारणंसिद्ध्यैकारणेनचतत्कथा ॥ क्रिय
वकारणंसिद्ध्यैःसत्यमेतन्मयोदितं ॥ शिश्नोदरार्थयोगस्यकथयावेषधारिणः ॥
अनुष्ठानविहीनास्तुवंचयंत्यखिलानजनान् । उच्चावचैःप्रलापैस्तेकुशलाहास्यका

नराः ॥ योगिनोवयमित्याहुर्मूढाभोगपरायणाः । ज्ञानैःज्ञानस्तथाविद्वान्योगा
भ्यासविवर्जिताः ॥ कृतार्थनिर्वचनैरेववर्जयेद्वेषधारिणः । यतस्तेमी विघ्नभू
तायोगाभ्यासस्यसर्वदा ॥ वर्जयेतिप्रयत्नेनतादृशान्सुधियोनराइति ॥ वा
सिष्ठ ॥ यस्यस्त्रीतस्यभोगश्चानिस्त्रीकस्यकभोगभूः । स्त्रियंत्यक्त्वाजगत्यक्तंजग
त्यक्त्वासुखीभवेत् ॥ नविषंविषमित्याहुर्विषयाविषमंविषं । जन्मांतरेष्वविषया
एकजन्महरंविषं ॥ यथाशास्त्रंविहरतात्वराकार्यानसिध्यति । चिरकालंपरीप
क्वासिद्धिःपुष्टफलाभवेत् ॥ इतिमार्कंडेयपुराणे ॥ अलर्कंप्रभगवन्योगिनश्चर्यां
श्रोतुमिच्छामितत्वतः । ब्रह्मवर्त्मन्यनुसरन्नयेनयोगीनसीदति ॥ दत्तात्रेयः ॥ संग
दोषान्स्वबंधुःस्वमंमत्वासक्तचेतसां । तस्मात्संप्रयत्नेनमुमुक्षुःसत्यजेन्नरः ॥ संगा
भावान्ममत्वस्यःख्यातेर्हानिःप्रजायते । निर्ममत्वंसुखायैववैराग्याद्दोषदर्शनं ॥
ज्ञानादेवचवैराग्यंज्ञानंवैराग्यपूर्वकं । तद्धंसयत्रवसतिस्तन्द्रोत्थंयत्नजीवति ॥
यन्मूलंयतदेवोक्तंज्ञानमज्ञानमन्यथा । उपभोगेनपुण्यानांमपुण्यानांचपार्थि
व ॥ कर्तव्यानांचनित्यानामकामकरणात्तथा । असंचयात्पूर्वसंक्षयात्पूर्वार्जित

स्यच॥ कर्मणोबंधमाप्नोतिशा रीरंनपुनर्नरः॥मानापमानोयावेतौ प्रीत्युद्वेगकरौ नृणां॥तावेवविपरीतार्थौयोगिनःसिद्धिकारकौ॥मानापमानोयावेतौतावेवा दुर्विषामृतौ॥आयमानोमृततत्र मानस्तुविषमंविषं॥चक्षुःपूतंन्यसेत्पादंवस्त्र पूतंजलंपिबेत्॥सत्यपूतंवदेद्वा णीबुद्धिपूतंविचिंतयेत्॥आतिथ्यश्राद्धयज्ञेषुद वयात्रात्सवेषुच॥महाजनेचसिध्यर्थंनगच्छेद्योगवित्क्वचित्॥यथैवअवमन्येत ज नाःपरिभवंतिच॥तथायुक्तश्चरेद्योगीसतांधर्ममदूषयन्॥सारभूतमुपासी तज्ञानंयत्कार्यसाधकं॥ज्ञानानांबहुतायत्रयोगविघ्नकरीहिंसा॥इदंज्ञेयमिद मितियस्मिंस्तत्त्वेचरेत्॥अपिकल्पसहस्रेषुनेवज्ञेयमवाप्नुया॥वाङ्मदंडःकर्म दंडश्चमनोदंडश्चतेत्रयः॥यस्यैतेनियतादंडाःसत्रिदंडीमहायतिः॥सर्वमात्मम यंयस्यसदसज्जगदीदृशं॥गुणागुणमयंयस्यकःप्रियःकाहयाःप्रियः॥विशुद्ध बुद्धिःसमलोष्टकांचनःसमस्तभूतेषुवसन्समाहितः॥स्खानंपरंशाश्वतमव्ययंच परंहिगत्वानपुनःप्रजायते॥समाहितोब्रह्मपरोप्रमादीशुचिस्तथैकांतरुचिर्जितेंद्रियः॥समाप्नुयाद्योगमिमंमहात्मा विमुक्तिमाप्नोतितताश्चयोगतः॥नाधमात्क्षु

BHAU DAJI MEMORIAL

धितःशांतानचव्याकुलचेतनः॥युंजीतयोगंराजेंद्रयोगीसिध्यर्थमादृतः॥रजसात मसोवृत्तिंसत्वेनरजसस्तथा॥संछाद्यविमलेतत्वेस्थितायुंजीतयोगवित्॥एतत्स र्वंमयाख्यातंतत्वालर्कयथार्थवत्॥प्राप्तंसयेनतद्ब्रह्मतत्सक्षेपान्निबोधमे॥शशांक रश्मिसंयोगाच्चंद्रकांतामणिःपयः॥समुत्सृजतिनायुक्तःसोपमायोगिनास्मृता॥ यथार्करश्मिसंयोगात्सूर्यकांताहुताशनं॥आविःकरोतिनैवंसंनुपमासापिपीप्लि का खुनकुलगृध्रांधाकपिंजलाः॥वसंतिस्वामिवद्गेहेध्वस्तथांतिततान्यतः॥दुःखं तुस्वामिनिध्वंसेतस्यतेषांनकिंचन॥वशमनायत्रराजेंद्रसोपमायोगिसत्तया॥तद्ब्र ह्मयत्रवसतिस्तद्ज्ञेयंयेनजीवति॥येनसंपश्यतेस्वार्थंस्तत्त्वंममतात्मका॥अत्य र्पितार्पितैःकार्यंकरोतिचरणैर्यथा॥तथाबुध्यादिसिद्धयोगीपारंयैःसाधयेत्परं॥ मृद्गृहिकात्यदेहापिमुखाग्रेणात्पणीयसा॥करोतिभ्रमरंचयमुपदेशःसयोगिनः॥ द्रव्यपूर्णमुपादायपात्रमारोहतेशुचः॥तुंगमार्गंविलोक्याशुविज्ञानंतेनयोगिनः॥ रुरुवराविषाणाग्रमालक्ष्यतिलकाकृतिं॥सहतेनविवर्यंतयोगीसिद्धिमवाप्नुया त॥जीवनायालंसर्वस्वनानिर्वातेपुरुस्यया॥चेष्टातांतत्वतोज्ञात्वायोगिनःकृतकृत्यता॥

स्कंदपुराणे॥नातितृप्तःक्षुधार्तोनननचिरान्मूत्रबाधितः।नाध्वखिन्ननचिंतार्थायो
गंयुंजीतयोगवित्॥युक्ताहारविहारश्चयुक्तचेष्टश्चकर्मसु।युक्तस्वप्नावबोधश्चयो
गीतत्वंप्रपद्यति॥भगवद्गीतायां॥नात्यश्नतस्तुयोगोस्तिननचैकांतमनश्नतः।नचा
तिस्वप्नशीलस्यजाग्रतोनैवचार्जुन॥युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु।युक्त
स्वप्नावबोधस्ययोगोभवतिदुःखहा॥आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन।
सुखंवायदिवादुःखंसयोगीपरमोमतइति॥ब्रह्मपुराणे॥रात्र्याःपश्चिमयामे
पूर्ववसुसमाहितः।पूर्वान्हेपश्चिमेचान्हियुक्ताहाराजितेंद्रियः।योगंयुंजीततिस
बंधः।याज्ञवल्क्यः।प्रातःकालेप्रदोषेचनिशीथेसुसमाहितइति॥नाजीर्णीनरसा
द्वारीनविण्मूत्रप्रबाधितः।नछर्दीनातिसारीचनातिसूक्ष्मश्रमान्वितः।नचाति
कर्मनिरताश्चिंताव्याकुलचेतनः।नयुक्तोगुरुकार्यैश्चनचातिक्षुत्पिपासितः।नचरो
गहबाधायांदोर्मनस्यादिसंभवइति॥वायुपुराणे॥नव्याध्यार्तःकदाचनेत्यादिनि
षधानंतरमुक्तं॥एतान्दोषान्विनिश्चित्यप्रमाद्योनेयुक्तिवे।तेयदोषाःप्रकुप्यंतिशा
रीरविघ्नकारकाः॥जडत्वंबधिरत्वंचमूकत्वंचापिजायते।अंधत्वंक्षतिलोपश्चस्वरो

रागस्तथैवच॥एतदोषाःप्रकुप्यंतिह्यज्ञानाद्योगनित्यवे॥तस्माज्ज्ञानेनसुत्यजनयो
गीयुंजन्समाहितः॥अत्रमत्तःसदाचरेन्नैषाप्राह्मुत्वन्वि"दिति॥महाभारते॥
मूत्रोत्सर्गपुरीषेचभोजनेचनराधिप।त्रिकालंनासियुंजीतयोगंयोगीकदाचन॥
अत्रमत्तोयथाधन्वीलक्ष्यंहंतिसमाहितः।युक्तःसम्यक्कृतायोगीमोक्षंप्राप्नोत्य
संशयं॥स्नेहपूर्णंयथापात्रंसमंआधायनिश्चलं।पुरुषोयत्नवांस्तत्रसोपानंयुक्त
मानसः।युक्तस्तथायमात्मानंयुक्तःपार्थिवनिश्चलं॥करोत्यमलमात्मानंसा
रापमनिर्मलं॥यथाचनावंकोतियकर्णधारःसमाहितः।महार्णवगतांशीघ्रंन
येत्पार्थिवसत्तम॥तद्वदात्मसमाधानंयुक्तोयोगनत्वंवित्॥दुर्गमंस्थानमाप्नो
तिहित्वादेहमिमंनृप॥व्यास॥योगदोषान्समुत्थाप्यपंचधा कवयोविदुः।कामं
क्रोधंचलोभंचभयंस्वप्नंचपंचमं।क्रोधंरामेनजयतिकामंसंकल्पवर्जनात्।सत्वसं
सेवनात्धीरोनिद्रांछ---ईति॥घ्रत्याशिश्नोदररक्षत्यापिपादंचचक्षुषा॥चक्षुः
श्रोत्रंचमनसामनोवाचंचकर्मणा॥अप्रमादात्तथैवाह्यादंभप्रज्ञोपसेवनात्॥एव
मेतान्रागदोषान्जयेन्नित्यमतंद्रितः।मनसश्चेंद्रियाणांचहृत्वैकाग्र्यंसमाहितः।

पूर्वरात्रापरार्धेचधारयेन्मनआत्मनि। कुर्यात्परिचयंयोगेत्रैकाल्यनियतोमुनिः॥ द्वि० प० २
सन्नियम्येंद्रियग्रामंकाशाभंडमनाइव। एकाग्रंचिंतयेन्नित्ययोगान्नोद्विजतेयतः॥
यतोयतोनशक्येतसन्नियंतुंचलंमनः। ततंचयुक्तोनिवसेत्ततश्चैवविचलेत्ततः॥ ना
क्षिपेत्परवाचाकर्मणामनसापिवा। नपक्षकोयताहारोलब्धे समाभवेत्॥ लब्धे
यश्चैनमक्षिनंदेतयश्चैनम पवादयेत्। समस्तयोश्चाशुभयोर्नाभिध्यायेच्छुभा
शुभं नप्रहृष्येतलाभेषुनालाभेषुचचिंतयेत्॥ एवंचस्खलितमनःसाधोःसर्वत्रसम
दर्शिनः। षण्मासान्नित्ययुक्तस्यब्रह्मातिवर्तते॥ एतस्मिन्निरतोमार्गेविरम
न्नचमाहितः। देशकालासनावेयोगानसिध्यत्येवततस्तावदाह निरूप्यते॥ लिंगपु
राणे॥ स्थानलब्धेवकुर्वीतयोगांगानितुवैक्रमात्॥ अदेशकालेयोगस्यदर्शनंच
नविद्यतइति॥ मार्कंडेयपुराणे॥ सत्वस्थानुपपन्नेचदेशकालविवर्जिते॥ नसतोद
र्शनंयोगेतस्मात्तत्परिवर्जयेत्॥ नातिशीतेनवाग्नेवद्वंद्वेनाप्यनिलात्मके॥ काल ५
ष्वेतेषुयुंजीतनयोगीध्यानतत्परः॥ सन्नाह्याग्निजलाभ्यासजीर्णगोष्ठचतुष्पथे॥
शुक्लपत्रचयेनद्यांशानेसरसीतटे। सप्तपर्णकुपतीरवाल्मीकसंचये। देशेष्व

तेषुतत्वज्ञोयोगाभ्यासंविवर्जयेत्॥ स्कंदपुराणे॥ नतायद्भिसा मीप्यनदीतीरा
ग्न्यगोष्ठयोः नदंशमंकाकीर्णनिचत्येनचचत्वरे॥ केशास्थिभसतुषांगारकसादिप्रद्वि
षिते॥ नाप्यसत्स्मृतिगंधादोनस्थानेजनसंकुले। इतिलिंगपुराणादिष्वपि॥ ना
शुचिदुर्जनाक्रांतमशकादिसमन्वित। इत्यादिनिषेधादृष्टव्या॥ ब्रह्मपुराणे॥ नदंश ३ मे
काकीर्णेयोगंयुंजीतकर्हिचि। दित्यानिषेधानंतरमुक्तं॥ दोषानेतानना दृत्यमूढत्व
द्योनेयुक्तिवे। प्रवक्ष्यतस्ययेदोषाजायंतेविघ्नकारकः। बाधिर्यंजडतालोपःस्म
तेर्मूकत्वमेवच। कासश्चजायतेसद्यस्तद्दोषज्ञानयोगिनः। तस्मात्सर्वात्मनाका
र्यारक्षायोगविदासदा॥ धर्मार्थकाममोक्षाणांशरीरंसाधनंयत इति॥ दत्तात्रेयस्तु॥ त
एतद्देशकालनिषेधानंतरंप्रमादेचाज्ञानेवजडत्वादिदोषा नभिधायतच्चिकित्सा
माह॥ प्रमादाद्योगिनोदोषायद्येतेस्युश्चिकित्सितं॥ तेषांनाशायकर्तव्यंयोगि
नातन्निबोधमे। स्निग्धोयवागूमुष्णांमुल्कातत्रैवधारयेत्॥ वातगुल्मप्रशांत्य
र्थंगुदावर्त्ततथादधि॥ यवागूंचापिपक्वांवायुग्रंथिंप्रतिक्षिपेत्॥ तद्वत्कफमहाग्रंथे
स्थिरंमनसिधारयेत्। विधातंवचसावाचि धैर्यंश्रवणेंद्रिये॥ यस्मिन्यस्मिन्क्रमो

देशोतस्मिन्सदुपकारिणीं॥धारयेधारणामुष्णेशीतांशीतेविदाहि नींकीलंशिरश्चिसंस्थाप्यकाष्ठंकाष्ठेनताडयेत्॥लुप्तस्मृतेःस्मृतिःसद्योयोगिनस्तेनजायते॥यावापृथिव्यावंग्नीव्यापिनावह्निधारयेत्॥अमानुषाःस्वत्वजातबाधाश्चेतःस्थिकीर्तिताः॥अमानुषंसत्वमेतयोगिनंप्रविशेद्यदि॥वायुवग्निधारणाचेत्तद्देहसंस्थंविनिर्दहेत्॥एवंसर्वात्मनाकार्यारक्षायोगविदानृप॥धर्मार्थकाममोक्षाणांशरीरंसाधकंयतइति॥अथविहितानिकथ्यंते॥तत्रकालःपूर्वमुक्तोवक्ष्यतेच॥आदिपुराणे॥एकांतागिरिदुर्गेषुतीर्थयितनदूरे॥योगस्याभ्यसनंकार्यमितितत्वविदोविदुरिति॥याज्ञवल्क्यः॥तपोवनंसुसंप्राप्यफलमूलोदकान्वितं॥तत्ररम्यशुचौदेशेब्रह्मद्योषसमन्वितं॥स्वधर्मनिरतैःशांतैर्ब्रह्मविन्निःसमाहृतं॥वारिस्निग्धंसुसंपन्नंपुष्पैर्नानाविधैर्युतं॥फलमूलैःसुसंपन्नंसर्वकामफलप्रदं॥देवालयेवानद्यांवाग्नौमेवानगरेपिवासुशोभनंमठंकृत्वासर्वकामसमन्वितं॥तस्मिन्योगंसमभ्यसेदित्युत्तरेणसंबंधः॥योगतत्वप्रकाशे॥सुशोभनंमठंकुर्यात्सूक्ष्मद्वारंसुनिःप्रसं॥सुलिप्तंगोमयेनैवसुधयावाप्रयत्नतः॥मक्षिकामशकैर्दंशैरतैश्च

DR BHAU DAJI

परिवर्जितं॥दिनेदिनेचसंमृष्टंसंमार्जन्याप्रयत्नतः॥वासितंचसुगंधेनधूपितंगुग्गुलादिभिरिति॥हटप्रदीपिकायां॥सुराज्येधार्मिकेदेशेसुभिक्षेनिरुपद्रवे॥एकांतमठिकामद्रेस्थातव्यंहठयोगिना॥अल्पद्वारमरंध्रगर्तघटितंनात्युच्चनीचापितंसम्यग्गोमयसार्द्रलिप्तविमलंनिर्दोषजंतुक्षितं॥बाह्यमंडपकूपवेदिरुचितंप्राकारसंवेष्टितंप्रोक्तंयोगमठस्यलक्षणमिदंसिद्धैर्हठाभ्यासिभिः॥एवंविधमठेस्थित्वासर्वचिंताविवर्जितः॥गुरूपदिष्टमार्गेणयोगमेवसदाभ्यसेत्॥इतिस्कंदपुराणे॥सर्वबाधाविरहितेसर्वेंद्रियसुखावहे॥मनःप्रसादजननेस्वधूपामोदमोदितइति॥नंदिपुराणे॥मंदिररम्यविन्यासमनोज्ञगंधवासितं॥धूपामोदादिसुरभिकुसुमोत्करमंडितं॥मुनितीर्थनदीवृक्षपक्षिनीरोलशोभितं॥चित्रकर्मणाबद्धंचचित्रभद्रविचित्रितं॥कुर्याद्योगगृहंधीमान्सुरम्यशुभवर्त्मना॥तथाद्दृष्ट्वाचित्रगतान्शांतान्मुनिन्यातिमनःशमंसित्यान्दृष्ट्वाचित्रगतान्मतिरभ्युद्यमेभवेत्॥मध्येयोगगृहस्याथलिखेत्संसारमंडलं॥श्मशानंचमहाघोरंनरकांश्चलिखेत्क्वचित्॥तान्दृष्ट्वाभीषणाकारान्संसारंसारवर्जितं॥अनुदरसादोभवतियोगीसिध्यत्यलंबुकः॥पश्य

श्वव्याधितान्तंतून्मत्तानमत्तांश्चलक्षयन्॥एवंविधश्चसुस्थात्मास्थितोयोगं हश्नुते॥योगांगान्यभ्यसेदितिसंबंधः लिंगपुराणादिश्चयतेदंयोगमंडलक्षणमुक्तं॥आहारनियमस्यनाडीशुद्धिद्वारात्यंतानुकूलत्वादाहारशुद्धौसत्यांशुद्धिरितिश्रुतेश्च। नाडीशुद्धेः प्रागाहारोनिरूप्यतेतत्रवर्ज्यानि॥दत्तात्रेयः॥अथवर्ज्यानिचवक्ष्यामियोगविघ्नकराणिच॥लवणंसर्षपंचाम्लमुष्णंरूक्षंचतीक्ष्णकं॥अतीवभोजनंत्याज्यमतिनिद्रातिभाषणमिति॥स्कंदपुराणे॥त्यजेत्कट्वम्ललवणक्षीरभोज्यंसदासवे"दितिहठप्रदीपिकायां॥कट्वम्लनिष्पावलवणाष्याहरीतशाकसौवीरतैलतिलसर्षपमत्स्यमद्यं॥अजादिमांसदधित्रकॢथकोलपिण्याकहिंगुलशुनाद्यमपथ्यमाहुः। भोजनमहितंविद्यासुनरुष्णीकृतंतथा।अतिलवणंसपलंवाप्रसितंशाकोत्कटंवर्ज्यं॥अथादेयानिचगोधूमशालियवषष्टिकशोभनान्नंक्षीराज्यमंडनवनीतसितामधूनि॥शुंठीपटोलकफलादिकपंचशाकंमुद्गादिचाल्यकमुद्गकंचमुनींद्रपथ्यं॥पिष्टंसुमधुरंस्निग्धंगव्यंधातुप्रपोषणं। मनोसिलषितंयोग्यंयोगीसोजनमाचरेदितिदत्तात्रेयः॥आदेयानिचवक्ष्यामिसिद्धयेयोगस्यसिद्धये॥क्षी

द्वि० प० २

कु

७

रंघृतंचमिष्टान्नंमिताहारश्चशस्यते॥कश्चित्कर्पूरमिछंतितांबूलंशोभनंतथा। चूर्णेनरहितंशस्तंपवनाभ्यासयोगिनां॥योगसंग्रहे॥शानुनाडीगतेप्राणेयोगीभोजनमाचरेत्॥सोमनाडीगतेप्राणेभोजनंनैवशस्यतइति॥प्रथमाभ्यासेक्षीरमेवशस्तमित्याहात्मारामः॥अभ्यासे ... प्रथमेकालेप्रशस्तंक्षीरभोजनं।ततोभ्यासेदृढीभूतेनताद्दृग्नियमग्रहइति॥अत्रतांबूलभक्षणंनित्यंतांबूलभक्षकग्रहस्यविषयंतेयमन्येषांभिक्षुकादीनांनिषेधस्योक्तत्वात्॥नायमस्तिनियमःक्षीरमेवभोक्तव्यमिति॥किंतुदेशकालानुसारेणयदायत्प्राप्यतेयच्चस्वरुचिपूर्वकंस्वशरीरसहतेतदेवभुक्त्वायोगोभ्यसनीयइतिध्येयं॥यच्चोक्तंशानुनाडीवाहिन्येवप्राणेयोगीभोजनंकार्यमितितदुत्तदाकाशगमसाध्ययोगिनःस्यात्तदाज्ञेयंतदानींखलुयोगाभ्यासिनः उक्तसर्वनियमानुष्ठानस्यानावश्यकत्वस्यवक्ष्यमाणत्वात्॥प्रथमाभ्यासेतुयदाक्षुधातदेवभोक्तव्यमेवान्यथायोगाग्निरोधेधातुवैषम्यणनानारोगसम्भवेनयोगप्रतिबंधेनतत्वज्ञानोत्पत्तामोक्षासिद्धेः ननुसायंप्रातर्मनुष्याणांभोजनंदेवनिर्मितं॥अंतरानाशनंकुर्यादग्निहोत्रसमोवि

द्वि० प० २

ना

ना

धिः। यतीचैब्रह्मचारीचविधवाचरत्नस्त्रिया। पुनर्भोजनतांबूलंभुक्त्वाचांद्रायणंचरेत्॥
दित्यादिधर्मशास्त्रेचतुर्णामपिवर्णानांश्रिमाणामेकद्विकालभोजनस्यविहितत्वात्
कथमनियतंभोजनंनियम्यतेन चयोगिनामाश्रमांतरमस्तिपूर्वोक्तानामेवचतु
र्णांवर्णाश्रमाणांयोगाभ्यासेधिकारस्योदाहृतपुराणादिवाक्येषुदर्शितत्वादि
तिचेन्नतच्छास्त्रस्ययोगीविषयत्वात्॥कुतोवगतमितिचेदत्रस्यानिक्षुधा
र्तस्ययोगाभ्यासनिषेधात्सदाचाभ्यासविधानादवगच्छामोयदायदाक्षुधात
दातदाभोक्तव्यमेवेति॥नचैककालभोजनस्यज्ञानांगभूतस्यानुरोधेनसर्वापे
क्षयाप्रधानभूतज्ञानस्यलोपायुक्तइतिमुख्यामुख्ययोःसंपातेमुख्यंबलवदि
तिन्यायात्॥अतएवश्रुत्यंतरेयोगाभ्यासिनांभोजनानियमःश्रूयतेतथाहि॥ए
ककालंद्विकालंवाचरेत्सरमहंसकः। येनकेनप्रकारेणज्ञानाभ्यासपरोय
तिरिति॥अत्रसतिपदंआश्रमत्रयस्याप्युपलक्षणं॥अथावश्यंज्ञातव्योयोगिना
यत्तन्निरूप्यते॥नचतज्ज्ञानंविनायोगसिद्धिरस्ति॥तथाचगोरक्षः॥षट्चक्रंषो
डशाधारंद्विलक्ष्यंव्योमपंचकं।स्वदेहेयेनजानंतिकथंसिध्यंतियोगिनः। एकस्तं

भंनवद्वारंगृहंपंचाधिदेवतं।स्वदेहेयेनजानंतिकथंसिध्यंतियोगिनः॥इतिषट्च
क्रषोडशाधारावश्यंते॥द्विलक्षंबाह्यमाभ्यंतरंचभ्रूघ्राणादिकं॥मूलाधारादिसं
चव्योमपंचकंतुहृत्कंठतालुभ्रूब्रह्मरंध्रांतं॥एकस्तंभंतुस्तंभनेवगृहंमनसेदंश
रीरंध्रियतेनस्तंभरूपंमनएवमूलाधारस्याधिष्ठानमणिपुरानाहतविशुद्धांतेषु
यथाक्रमंब्रह्मविष्णुरुद्रेश्वरसदाशिवादेवताःयाज्ञवल्क्यगीतायां॥गार्ग्यउवाच॥
भगवन्ब्रूहिमेस्वामिन्नाड़िशुद्धिंविधानतः।केनोपायेनशुद्ध्यास्युर्नाड़ियःसर्वदेहि
नां॥उत्पत्तिंचापिनाड़ीनांधारणांचयथाविधि।कंदश्चकीदृशःप्रोक्तःकतितिष्ठ
तिवायवः।स्थानानिचैववायूनांकर्माणिचपृथक्पृथक्॥विज्ञातव्यानियान्य
स्मिन्देहेदेहभृतांवर॥वक्तुमर्हसितत्सर्वंत्वत्तोवेत्तानविद्यते॥इत्युक्तोभार्यया
तत्रसम्यक्तद्गतमानसः॥गार्गिंतांचसमालोक्यतत्सर्वंसमभाषत॥शरीरंताव
देवंषण्वत्यंगुलात्मकं॥विद्ध्येतत्सर्वतंत्रज्ञांस्वांगुलीभिरितिप्रिये॥शरीराद
धिकप्राणाद्वादशांगुलमानतः।चतुर्दशांगुलंकेचिद्वदंतिमुनिसत्तमाः।द्वादशां
गुलमेवेतिवदंतिज्ञानिनोनराः।प्राणोपानःसमानश्चोदानोव्यान एवच॥नागःकू

र्मश्चक्रकरोदेवदत्तोधनंजयः। एतेनाडीषुसर्वासुचरंतिदशवायवः। एतेषुवायवः
पंचमुख्याः प्राणादयःस्मृताः। तेषुमुख्यतमंपुराणे॥कौर्मेवायुः प्राणनादिकर्मु
र्मभेदाद्यथाक्रमं॥प्राणापानसमानादि नामांतरमुपागतइतिअमरसिंहो॥अ
संख्यावायवोदेहेसंतियद्यप्युदाहृताः। तथापिश्रेष्ठकर्त्तारोप्राणापानोक्तताभ्यो।
नाडीष्वस्विरुपरिष्टाद्दृश्यते॥याज्ञवल्क्यः॥आस्यनासिकयोर्मध्येहृन्मध्यनाभिम
ध्यमे। प्राणालयमितिप्राहुःपादांगुष्टचकेचन॥अधश्चोर्ध्वंचकुंडल्याः परितःप्रा
णसंज्ञकः। तिष्ठत्येषुतचतुर्षुप्राकाशायत्तिदीपवत्॥अपान निलयंकेचिद्गुदमें
ढ्रोरुजानुषु। उदरचक्षणेकत्यांजंघनाभौवदंतिहि॥व्यानःश्रोत्रादिमध्येचहृक
गुल्फयोरपि॥घ्राणेगल्लस्फिचोर्देशेतिष्ठत्यत्रनसंशयः॥उदानसर्वसंधिस्थः
पादयोर्हस्तयोरपि। समानःसर्वगात्रेषुसर्वव्यापिव्यवस्थितः। रसंसर्वरसंगा
त्रव्यापयन्वह्निनासह॥द्विसप्ततिसहस्रेषुनाडीमार्गेषु ---। समानवायु
रचेकः साग्निर्व्याप्यव्यवस्थितः। अर्चिस्सिःसहसर्वत्रसांगोपांगेकलेबरे। नाग
दिवायवःपंचत्वगस्थ्यादिषुसंस्थिताः। तुंदस्थंजलम चरसादिचसमीरितं

न्नं

तुंदमध्यगतःप्राणस्तानिकुर्यात्पृथक्पृथक्॥उपर्यग्नेर्जलंस्थाप्यत्वंन्नाशीनिज
लोपरि॥स्वयंत्वपानंसंप्राप्यतेनैवसहमारुतः। प्रवर्तिज्वलनंतत्रप्राणोमध्यग
तःपुनः। वायुनाचालितोवन्हिरपानेनशनैःशनैः। तदाज्वलतिविप्रेंद्रेसकलेदेह
मध्यमे॥ज्वालाभिर्ज्वलनस्तत्र प्राणेनप्रेरितस्ततः। जलमत्युल्बुमकरोत्कोष्ठम
ध्यगतंतदा॥अन्नंव्यंजनसंयुक्तंजलोपरिसमर्पितं॥ततःसुपक्वमकरोद्वह्निः
संतप्तवारिणा॥स्वेदमूत्रेजलंस्यातांरूपंवीर्यंरसोसवेत्॥पुरीषमन्नंस्याद्वह्निप्रा
णःकुर्यात्पृथक्पृथक्॥समानवायुनासार्धंरससर्वासुनाडिषु॥व्यापयद्यूसरूप
णदेहचरतिमा तः। व्यामरंध्रेष्वनवसिर्विण्मूत्रादिविसर्जनं। कुर्वंतिवायवःस
र्वशरीरेषुनिरंतरं। निश्वासोच्छ्वासकासाश्चप्राणकर्मेतिकीर्तितं॥अपानवायो
कर्मेतद्विण्मूत्रादिविसर्जनं। हानोपादानचेष्टादिव्यानकर्मापिचेष्यते। उदानक
र्मेतत्प्रोक्तंदेहस्योन्नयनादियत्। शोषणादिसमानस्यशरीरकर्मकीर्तितं॥उद्गा
रादिगुणोयस्तुनागकर्मेतिचोदितं। निमीलनादिकूर्मस्यक्षुतंचकृकरस्यच॥दे
वदत्तस्यविप्रेंद्रेजृंभणंकर्मकीर्तितं। धनंजयस्ययशोवृद्धिसर्वकर्मप्रकीर्तितं॥तथा

पंचानामपिप्राणादीनांस्थानवर्णबीजानिनकुलीशयोगपुराणे॥ प्राणोघ्राण य
महन्नासिपादांगुष्ठांतसंस्थितः। नीलः सोंकाररेफादिबीजेनविनियोजितः॥
कृष्णापानःहृकटिस्थःषष्ठषष्ठांतपार्ष्णिगः। सतारकनकारांतबीजेनविनियो
जितः। शक्रचापनिभोध्यानःत्वगिंद्रियनिकेतनः॥तारकोपेतयांतांतबीजते
जोविराजितः। भ्रूत्वस्थोमध्यतालुस्थकंठहृत्पत्तलाश्रयः। उदानो रुणछाय
तारकाक्रांतयांतयुक्॥ श्वेतःसमानोहृन्नाभिसर्वसंधिनिकेतनः। प्रणवाक्रांत
सांतेनबीजेनात्यंतमुज्वलः। रेफस्यार्द्धकारःप्रणवसहितोयकारःप्राणस्य
बीजमित्यर्थः। सतारकःसप्रणवःसचासौनकारस्यांतः पकारस्तेनबीजेनरंजि
तोपानःयांतांतालकारःसोंकारोलकारोव्यानस्यबीजमित्यर्थः। अत्यरुणात्यंत
लोहितस्तालवर्णंघंटिकाकोटिःपत्तलंचरणतलं॥यांतोरेफःसोंकाररेफउदान
स्यबीजमित्यर्थः। प्रणवेनाक्रांतश्चासौलांतोवकारश्चसोंकारोवकारःसमानस्य
बीजमित्यर्थः। अत्रसर्वत्रवायूनामरूपाणामपिनीलादिवर्णविशेषाध्यानार्थम
सिद्धि तइतिद्रष्टव्यं॥ याज्ञवल्क्यः॥ देहमध्यशिखिस्थानंतप्तजांबूनदप्रभं वि

कोणंतुमनुष्याणांचतुरश्रंचतुष्पदां॥ मंडलंतुपतंगानांसत्यमेतद्ब्रवीमिते। तन्म
ध्येतुशिखातद्वीसदातिष्ठतिपावकी। देहमध्यंचक्षुस्त्रिंश्रोतुमिलसिचक्षुष्टात्तु
द्व्यंगुलाद्ऊर्ध्वमधोमेद्रात्तुद्व्यंगुलात्। देहमध्यंतयोर्मध्यमनुष्याणामितीरितं। च
तुःपदंतुहृन्मध्येतिरश्चांतुदमध्यमे। द्विजानांतुवरारोहेतुंदमध्यमितीरितं॥ कंद
स्थानंमनुष्याणांदेहमध्यान्नवांगुलं। चतुरंगुलविस्तारमायामंचतथाविधं॥अं
डाकृतिवदाकारंभूषितंतत्वगादिभिः। चतुःपदांतिरश्चांचद्विजानांतुदमध्यमे॥
तन्मध्येनाभिरित्यक्तंनाभौचक्रसमुद्भवः। द्वादशारयुतंतच्चतेनदेहःप्रतिष्ठितः।
चक्रेस्मिन्त्वमतेजीवःपुण्यपापप्रचोदितः। तंतुपंजरमध्यस्थोयथात्वमतिलूतकः।
जीवस्यमूलचक्रेस्मिन्नधःप्राणश्चरत्यसौ॥ प्राणाद्वोसर्वजीवःसर्वदेहेषुसर्वदा॥
तस्योर्ध्वंकुंडलीस्थानंनाभेस्तिर्यगधोमुखं॥अष्टप्रकृतिरूपासाअष्टधाकुंडलीकृता॥
यथावद्वायुसंचारंजलान्नादीनिनित्यशः। पतितःकंदपार्श्वेषुनिरुध्यैवसदास्थिता॥
मुखेनैवसमावेष्यब्रह्मरंध्रमुखंतथा॥योगकालत्वपानेनप्रबोधंयातिवह्निना।
स्फुरंतीहृदयाकाशेनागरूपामहोज्वला॥वायुर्वायुमुखेनैवततोयातिसुषुम्णया। कं

दमध्यस्थितानाडीसुषुम्णेतिप्रकीर्तिता॥तिष्ठंतिपरितःसर्वाश्चक्रेस्मिन्नाडिसंज्ञकाः।नाडीनामपिसर्वासांमुख्यागार्गि चतुर्दश॥इडाचपिंगलाचैवसुषुम्णाचसरस्वती॥वारुणीचैवपूषाचहस्तिजिह्वापयस्विनी।विश्वोदरीकुहूश्चैवशंखिनीचयशस्विनीअलंबुषाचगांधारीमुख्यास्त्वताश्चतुर्दश॥॥तासांमुख्यतमास्तिस्रःस्तिस्रश्चैकोत्तमामता।मुक्तिमार्गेतिसाप्रोक्तासुषुम्णाविघ्नधारिणी॥कंदस्यमध्यमेगार्गि सुषुम्णासुप्रतिष्ठिता॥पृष्ठमध्यस्थितनाथासहमर्धोस्थितासदा।मुक्तिमार्गेतिसाप्रोक्ताब्रह्मरंध्रेतिकीर्तिता॥अव्यक्तासेवविज्ञेयासूक्ष्माचवेणावैस्मृता॥हठप्रदीपिकायां॥सुषुम्णाशून्यपदवीब्रह्मरंध्रंमहापथं।श्मशानीशांभवीमध्यमार्गश्चेत्येकवाचकमिति॥अत्रसुषुम्णायामुक्तिमार्गत्वंतयोर्ध्वमायंन्नमृतत्वमेतीतिवक्ष्यमाणायाळोग्यश्रुत्यामुक्तिसाधनद्वारधारणादत एवकाशीविदियमविमुक्तमितिसमाख्यायते॥तथाचोक्तमविमुक्तत्रैविध्यंकाशीमीमांसायां॥त्रीण्याध्यात्मिकाधिदैविकाधिभौतिकानीतिसूत्रं॥आध्यात्मिकाविमुक्तमियंनाडीतिस्कंदपुराणेदर्शितं॥सहोवाचब्रह्माबालिरारुणासिरिडामत्त॥व

GENERAL LIBRARY डाक्टर भाऊदाजी लाड मेमोरियल MEMORIAL

रुणापिंगलानाडीतदंतरत्वविमुक्तकमिति॥तथासासुषुम्णापरानाडीत्वियंवाराणसीत्वसावितिकूर्मपुराणेप्यस्याएवतत्तत्प्रदेशविशेषावच्छेदेनमुक्तिप्रदत्वात्तत्तत्प्रदेशानामविमुक्तत्वसमाख्यानं॥भ्रूमध्यनासिमध्येचहृदयेपिचमूर्धनि॥यथाविमुक्तमादित्यवाराणस्यांव्यवस्थितं॥वरणायास्तथावास्यामध्येवाराणसीपुरीतिच॥अत्रचाविमुक्तेद्वेशब्दचारःतथाचायमत्रान्वयःयथामुक्तिशब्दआधिदैविकेद्यावाष्टथिव्योःसंधिरूपआदित्येव्यवस्थितःयथाचाधिभौतिकेवरणासीमध्यवर्तिनिवाराणसीसंज्ञकेपुरेव्यवस्थितः तथाचाध्यात्मिकेत्रूमध्येहृदयेचचक्रविशेषावछिन्नसुषुम्नाप्रदेशेव्यवस्थितइति॥याज्ञवल्क्यःप्राह॥इडाचपिंगलाचैवतस्याःसव्येचदक्षिणे॥सौम्यायांपिंगलायांचरत्नश्चंद्रप्रभास्करौ॥इडायांचंद्रमाज्ञेयःपिंगलायांरविस्मृतः।चंद्रस्तामसइत्युक्तःसूर्योराजसउच्यते॥विषभागोरवेर्भागःसोमभागोमृतंस्मृतं॥तावद्यत्नःसकलंकालंरात्रिदिवात्मकं॥शक्तीसुषुम्णाकालस्यगुह्यमेतदुदाहृतं॥अमृतसिद्धौ॥मेरुशृंगस्थितःश्चंद्रोद्विरष्टकलयान्वितः॥अहर्निशंतुषारात्मासुधांवर्षत्यधोमुखः।ततोमृतंद्विधाभूतंविज्ञातव्यंविचक्षणैः॥इ

डामार्गेणपुष्ट्यर्थंषयन्मंदाकिनीजलं॥पुष्ट्यातिसकलंदेहंसूक्ष्मनाडीयथागतं।ए
षचंद्रस्वरूपोहिवाममार्गेव्यवस्थितः।अपरःकुंदइंदाभोहकर्षितमंडलः।मध्य
मामध्यमार्गेणसृष्ट्यर्थंयातिचंद्रमाः।मध्यमामूलसंस्थानेतिष्ठत्तेसूर्यमंडलं॥
कलाद्वादशसंपूर्णोदीप्यमानश्चरश्मिभिः।ऊर्ध्ववहतिदक्षेण---तीक्ष्ण
मूर्तिः॥एषसूर्यःपरामूर्तिर्नराणांदक्षिणेपथि॥वहतेलग्नयोगेनसृष्टिसंहरकः
दक्षतरगतिंत्यत्वाकायदामरुसमीरविः।विषुवंतहिज्ञानीयात्पुण्यकालंकलेव
र॥ज्ञात्वाचविषुवंदेहेसाभ्यासावर्त्मशालिनः।नक्रांतिंकालयोगेनसुखंकुर्वंति
योगिनः॥ऋतुःसंध्यादिशोरात्रिःकलाकाष्ठाक्षणादयः।आदानंचविसर्गश्च
सर्वंसूर्यतोभवेत्॥सूर्योहिनाभिसंबंधाच्चंद्रोभवतियोगतः।बाह्यसृष्टिस्तदाज्ञे
यायोगोभ्यंतरतोभवेत्॥ग्रहणंतद्विजानीयाद्बाह्याभ्यंतरतोध्रुवं॥बाह्यपुण्य
तमःकोलोमुक्तिश्चाभ्यंतरंभवेत्॥चंद्रबिंबंयदासूर्योगृह्णातिचंद्रमंडलं॥अन्यो
न्यंज्ञायतेयोगस्तस्माद्योगोहिलभ्यते॥सूर्योवह्निर्यदादेवाद्ऊर्ध्ववहतिदेहिनां॥
अधश्चंद्रामृतंयातितदामृत्युर्नृणांभवेत्॥सर्वाण्येवहितत्वानिव्रजंत्यूर्ध्वंकलेवरं॥

एतोमुक्तिप्रदोख्यातासूर्याचंद्रमसौसदेति॥याज्ञवल्क्यः॥सरस्वतीकुहूश्चैवसुषुम्णा
पार्श्वयास्थिते।गांधारीहस्तिजिह्वाचइडायाःपृष्ठपूर्वयोः।कुहूश्चहस्तिजिह्वायामध्ये
विश्वादरीस्थिता॥यशस्विन्याःकुहोर्मध्येवारुणीचप्रतिष्ठिता।पूषायाश्चसरस्व
त्याःस्थितामध्ययशश्विनी।गांधार्याश्चसरस्वत्याःस्थितामध्येचशंखिनी॥अ
लंबुषाचविप्रेंद्रेकंदमध्यादधःस्थिता॥पूर्वभागेसुषुम्णायास्त्वामेढ्रांतंकुहूस्थि
ता॥अधश्चोर्ध्वंचविज्ञेयावारुणीसर्वगामिनी॥यशस्विनीयाम्यस्यपादांगुष्ठां
तमिष्यते॥सरस्वतीतथाचोर्ध्वमाजिह्वायाःप्रतिष्ठिता॥आसव्यकर्णाद्विप्रेंद्रेशंखि
नीचोर्ध्वमागता॥गांधारीसव्यनेत्रांतमिडायाःपृष्ठतःस्थिता।इडाचमध्यनासां
तंसव्यभागेव्यवस्थिता।हस्तिजिह्वांतयासव्येपादांगुष्ठांतमिष्यते।विश्वोदरीतु
यानाडीसव्येसव्यगतास्मृता॥अलंबुषामहाभागपायुमूलादधोगता॥एतास्तन्मः
समुत्पन्नानाडयोन्याश्चतास्त्रयि॥यथाश्वत्थदलेतद्वदंजपत्रेषुवासिराः।नाडीश्च
तासुसर्वासुविज्ञातव्यातपोधनइत्यादि॥सांख्ययोग॥चक्रमध्येस्थितानाड्यः[illegible]
स्त्रयःस्त्रियश्चदेवताः।इडाचवरुणीनाडीपिंगलाब्रह्मदेवता॥ऐश्वरीसासुषुम्णास्या

न्मेरुमध्येव्यवस्थिता॥ नाडीमध्यागतग्रंथीत्रययुक्तात्रिवेणिका। उत्तरेवहतेगंगा यमुनादक्षिणेतथा॥ सरस्वतीपश्चिमायांमासांसंगःसदांतर॥ इतिअमृतसि द्धौ॥ गंगायमुनयोर्मध्येवहत्येकासरस्वती आसातुगमेस्नात्वाधन्यायां -- ति मिति॥ मानसोल्लास सोमाधारेहस्तिनिकाच नयनांतंप्रधावता॥ नाडीचक्रेणसं स्पृत्ता नासिकांतमुखेगते॥ नाभिमंडलमाश्रित्यकुक्कुटांडमिवस्थित। पृषाल बुषानाडीकर्णद्वयमुपाश्रिते॥ नाडीभुक्ताह्वयातस्माद्ब्रह्मध्यमनुसर्पति। सर स्वत्याख्यानाडीत्रिकांतावाकूप्रसारिणी॥ नाडीविश्वोदरीनामभुक्तेत्रंसाचतु र्विधं। पीत्वापयस्विनीतोयंकंठस्थाकुरुतेसुतं। नाडीचक्रात्समुद्भूतानाड्यः स्तित्रःस्त्वधोमुखाः। राकाभुक्तिसिनीवाली मूत्रंमुंचेत्कुहूर्मलं। भूक्तोन्नंसमा दायरंखिनीधमनीपुनः। कपालकुहरंगत्वामूर्ध्निसंचिनुतेसुधां। ज्ञातंचैका चनाड्यस्युस्तासामेकाशिरोगता॥ तयोर्ध्वमायन्मूत्रःस्याद्इतिवदंतशासनं। अत्रसुषुम्णामुखंमूलाधारएवविज्ञेयंतथाचसुरेश्वराचार्यैः देहस्यमध्यस स्थानंमूलाधारइतीर्यते। गुह्येंगुलाद्ऊर्ध्वं -- मेढ्रात्तुह्यंगुलादधः। त्रिकोणाधा

मुखाग्रश्चकन्यकायोनिसंनिभः। यत्रकुंडलिनीनामपराशक्तिःप्रतिष्ठिता॥ प्रा णाग्निबिंदुनादानांसावित्रीसासरस्वती। मूलाधाराग्नकोणस्थासुषुम्णाब्रह्म रंध्रगा॥ मूलेर्धछिन्नवंशाभाषडाधारसमन्विता। तत्पार्श्वकोणयोर्जातेहइडा पिंगलास्थिते॥ नाडीचक्रमितिप्राहुस्तस्मान्नाड्योविनिर्गताः। षट्चक्रोदन नदेवीस्तुवन्हिः। श्रीशंकराचार्यैरपिसुषुम्णामुखंमूलाधारय -- कं तथाहि॥ म हींमूलाधारे कमपिमणिपूरेहुतवहंस्थितंस्वाधिष्ठानेहृ -- रुतमाकाशमुपरि॥ मनोपिमारुत्मध्येसकलमपिभित्वाकुलपथं सहस्रारपद्मसहरहसिपत्याविहर सि॥ सर्वमंत्रशास्त्रेष्वपितन्मुखमुक्तं॥ याज्ञवल्क्यवसिष्ठादीनांगोरक्षादियो गिनांमतेनाभिस्थंकंदमद्ब्रसुषुम्णामुखंकुंडलिनीचब्रह्मविष्णुग्रंथित्रयंस्थितयोर्मूला धारस्वाधिष्ठानचक्रयोर्सदानुपपन्नमतमिदंचिंत्यं॥ योगभास्करे॥ दशनाड्योदश स्थानिवन्हयोदशवायवः। एतेषामविरोधेनयोगाभ्यासपरोभवेत्॥ तत्रनाड्यो वायवश्चपूर्वमेवोक्ताः। एषवंशोललाटास्थिकंधरंचुबुकंतथा॥ नासावंशऊरावृ हुपादावूरुचजानुनी॥ एतानिचदशास्थिनिदशवन्हिंततश्रुणु। त्वाजकोरंजक

श्चैव वातकश्लेष्मकस्तथा। पाचकोरंजकश्चैव साधकोष्मः॥ पोषकोवोधकश्चै
तिदेहेस्मिन्दशवन्हयः॥ अमृतासित्यौ॥ कलाभिर्दशभिर्युक्तः सूर्यमंडलमध्यगः॥
वसतेवस्तिप्रदेशेवन्हिरत्र विपाचकः। यावत्सूर्यस्यमध्यस्थःकालानलकले
वर॥ तावद्विंदुप्रभावोयमविच्छिन्नःसुधामयः। वन्हिर्बलप्रदोलोकेवन्हिरायुः
प्रदायकः। स्वस्थोयावदयंवन्हिर्नरस्तावन्निरामयः। अतस्तद्विरोधनेवया
गाभ्यासः कर्तव्यइतिभावः अथाधाराःशिवयोग॥ अथतेषाडशाधाराःकथ
यामिविशेषतः। तेज्ञोध्यानंपदांगुष्ठस्थिरासंवत्॥ पादस्यपार्ष्णिनोमूलंद्वितीया
धारसंज्ञकं। संपिड्यस्थापयेदग्निदीपनंस्यात्क्षणात्॥ आकुंचयेद्गुदंधीरः पा
दसंकोचनेनतु॥ अपानमूर्ध्वतोधेर्य्यंजायतेतत्तृतीयकं मेढ्राधारेदंडसंकोचनेन
ब्रह्मग्रंथीन्स्त्रीन्समुत्सृज्य पश्चात् चेतोवायोर्ब्रह्मनाड्यांप्रवेशाद्विदुस्तंसंवत्स
वसाद्यः पंचमाधारंमोदनंआनंद॥ तात्वा कुर्महः मलसूत्रक्रमीणांचजारणं
वतिध्रुवं॥ नाभ्याधारंततस्तत्रप्राणवायोर्लयंबुधः। समाधिनैकचित्तेनतस्यना
दोद्भवःसंवत्॥ सप्तमंहृद्याधारंतत्रप्राणान्निरोधयेत्॥ तदांतन्मध्यकमलविका

DR BHAU DAJI MEMORIAL

मोसंवत्क्षणात्॥ कंठाधारंकंठकूपंपीडयेच्चुबुकेनतु। इडापिंगलयोर्वायुप्रग्रहःसु
स्थिरोसंवत्॥ नवमंघंटिकाधारंजिह्वाग्रंतत्रदापयेत्॥ सुधाकलास्रवत्येषासा
दुस्तृप्तिकारिणी॥ यालंबिकाचालनदोहनाभ्यांदीर्घीकृतासाविपरीतमार्गतः॥
यस्तालुमूलांतरगर्भदेशंप्रवेशयेत्सान्मनतांप्रयाति॥ सेयंखेचरीमुद्रास्याःस्वरू
पंप्रभावश्चमुद्राप्रकरणेवक्ष्यते॥ जिह्वाधोरसनाधारंकुर्य्याद्योमधनंयदि। सिध्ये
त्तस्यामृतस्वादःकवितास्यकुटीसंवत्॥ द्वादशांदशनाधारंऊर्ध्वंतद्राजदंतकं। षण्मा
सादृश्यतेज्ञातिस्तत्रजिह्वाग्रंघ नात्॥ त्रयोदशंघ्राणमूलंतत्रदृष्टिंस्थिरीकृता।
यदिस्यान्मनसानित्यंवायुस्तत्रस्थिरोसंवत्। चतुर्दशंललाटाख्यमाधारंयत्रयोग
वित्॥ मनसावायुमारोप्यसर्वसिद्धिमवाप्नुयात्॥ व्योमाधारंपंचदशंतदूर्ध्वंचक्षु
षाबुधः। पश्यन्सकीरणाकारं शीघ्रमेवहिपश्यति। नेत्राधारंषोडशंतदूर्ध्वंचा
लयेद्धः। ज्ञातिःपुंज्ञमपांगतःपश्यतिक्षिप्रमेवहि। परमस्त्रिवइति॥ अथषट्चक्रा
णिसांख्ययोगे॥ अतःपरंप्रवक्ष्यामिषट्चक्राणिशृणुप्रिये॥ मूलाधारमधिष्ठानं
मणिपूरमनाहतं। कंठदेशेविशुद्धिःस्यादाज्ञाभ्रूमध्यसंस्थिता। चतुःकोणोयमा

धारः स्थितिःषट्कोणरूपिणी। मणिर्त्रिकोणंस्यादनाहतं। विशुद्धिचक्रं पूर्णेंदुसदृशंपरिकीर्तितं। अष्टदिव्याशिखाकाराश्चुणुचातःपरंप्रिये। आधारःपीतवर्णस्याद्स्वाधिष्ठानंजलात्मकं। मणिर्नीलांजनप्रख्यारक्तवर्णत्वनाहतं॥ विशुद्धिःस्फटिकप्रख्यास्यादाज्ञासर्ववर्णाभाकु। केचिद्वदंतित्रिकोणांसंस्वाधिष्ठानं। रविंदकं। तथाज्ञापंकजंशुक्लंपरमात्मप्रकाशनं॥ शक्तियोगे॥ चत्वारिचषडाधारो द्विद्वादशषोडश। द्वयपद्मासनादीनांयत्रसंख्यासमीरिता॥ अत्रह्विरंडोबाल्याख्यस्तथाफणिपिनाकिनौ। छगलंडोमहाकालःसित्थास्त्वेतेयथाक्रमं॥ डाकिनी काकिनीचैवलाकिनीकाकिनीतथा। शाकिनीहाकिनीचैवचक्रमाद्देव्योभवंतिच। इत्येवंसर्वचक्राणिसर्वसिद्धिकराणिवै। गुरूपदेशविधिनाविद्यात्तानियथाक्रमं॥ चक्रभेदनप्रकारःस्त्रिपुरासारसमुच्चये॥ अथपूरकयोगज्ञितांतःषडब्जोन्नतमूलकंदशोविदधीतबुधःसमाहितोज्ञोपपदग्रंथिविभेदनप्रयत्नंशक्तसमुत्थज्ञशक्तिर्यथास्यसंकोचयत्कंबुनिमार्गमर्चा॥ बुधस्तथाधारनियोजदात्मासंकोचयत्कंबुनिमार्गमुच्चैः विदधीतमुहुर्मुहुर्गुरुक्तक्रमतोहुंकृतिमंकलग्नपाणिः दृढरज्जुगुंफ्य

जांतरालस्थिततेजोमयपुष्करामृतयानिः अथकंबुनिमारुतंयतात्माप्रतिलोमनयानेः प्रवेशयेतं॥ कमलासनपंकजमूलंस्वगुरुप्रोक्तविधानतादुराधंअमुनाविधिनामुहुः कृतेन॥ क्रमशःकंबुनिमारुतस्तातोसौअब्जपंकजमूलदेशामार्गणीयमंथिविभेदनंकरोति॥ परिहस्वगाधिपतिस्तातोसौसरणिंचंद्रमसानसोमण्यब्जकमलंकमलासनस्यपश्चाद्विदधीताध्वंमुखंप्रविश्यसम्यक्॥ प्रतिभानमद्भुतंप्रविष्टश्चवनांतःपरमेष्ठिनःस्वगेशः॥ लघुतावपुषाभवत्पुरन्नाजठरांतर्दहनस्यचाति दीप्तिः॥ तडित्कोटिप्रख्यंस्वरुचिजितकालानरुचिंसहस्रादित्यांशुप्रकरसदृशांघोतकालितामृतमतयोन्यातःस्फुरणबंधूककुसुमप्रभं कामंध्यायेज्ज्ञरत्नशशांशकोटिशिरं॥ तस्यार्ध्वंग्निशिखाचिरघुतिलतापुंजप्रभाभास्वरासूक्ष्माब्रह्मपथांतरातरगताचतन्यमात्राकला॥ एकीभूतमनंतरंसहतयाध्यायेत्स्वयानिश्चलंस्वात्मानंचनियांतदीपनिभयाहंसस्वरूपंबुधः॥ शक्तिःकुंडलनीतियानिगदिताआद्यमसंज्ञाडगन्निर्माणसततो ताप्रविलसत्सौदामिनीसन्निभा॥ शंखावर्तनिभाप्रसुप्तभुजगोंकारंजगन्मोहिनी॥ तन्मत्वेपरिभावयेद्विसलतातंतूपमयाकृतिंहुंकारेणगुरूपदेशविधि

धिनाप्रोत्थायसुप्तोत्ततः कृत्वातांकलया परमयाचिद्रूपयासंगतां॥मायांकुं डलिनींसमाहितमनास्तामुच्चरेत्कोलकींशक्तिंब्रह्ममहापथेनसहितामाधारतः स्वात्मना॥भित्वालिंगत्रयमथबुधोब्रह्मनाड्योर्ध्वमुर्ध्वंगच्छंतींतोकमलज्ञनिल यात्प्रापयेदात्मशक्तिं॥व्योमांभोजप्रणयिपरमानंदकंदेविसर्गस्थानंचंद्रोपयि परिगलदृक्कपीयूषधारं॥पीत्वाकुलांऽमृतरसंपुनरेवदिव्यंमध्यंविशेदपघन स्यसमाहितात्मा॥यायात्कुलादकुलमेवपुनश्चमात्रायोगेनदीक्षिकवरप्रतिपा दितेन॥साशक्तिःसकलशरीरजीवभूताप्राणोसावितिगदितातंत्रमुख्यैःगृहीतः सतुपरियत्नतेमुनींद्रैःप्राणस्तंस्मृतियदाक्रमेणनीतः अमुंस्वाचारस्थः प्रतिदि वसमभ्यासनिरतःकरोतिश्रद्धावानूसततमवधूताखिलमलः॥समुक्तोदुःखौघै रपगतजराकुञ्जामरणोगुणग्रामोपेतःसुरइवचिरंजीवतिभुवि॥चतुर्विधाया कथितेहसृष्टिःप्रवर्त्ततेत्यासकलापियस्यां॥प्रलीयतेचापिजगत्समग्रंकालाग्नि रुद्रादिसदाशिवांतं॥यंयंमयोक्तंखलुयोनिबंधस्तुदेवेरपिदुर्लभोस्याः अने नबंधेननसाध्यतेयन्नास्तेवतत्साधकपुंगवस्य॥गुरुतस्यनिषेवणंचयानंद्वि

द्वि० य० २

त्र

१६

ग्नि

हत्यामधुनःस्वर्णचोर्य्यंअमुनाविलयंप्रयातिसम्यक्सकृदप्याचरितेनबंधनेना सतुमंत्रिवरःसएवयोगीगुणसिद्धेःपदमास्थितःसएवअमुनाचरतीहबंधनें यःसततं स्वोचितधर्मकर्मनिष्ठःअमुनाभवतीहदेहभाजांसततास्यासकृतेन बंधनेननजराविलराजवैद्ययंतीनचमृत्युप्रतिपादिताचभीतिः॥एतस्यैवहिबं धनस्यमनुजःप्राप्नोतिसम्यक्कृतादस्यासादणिमादिसिद्धिमतुलांसंचितिमा णरक्षितां॥योगंचाप्रतिमंजयंचमरुतःकोलस्यवावंचनंतद्विद्धोःपरमंपदंपरतरं पश्यंतियत्सूरयः॥इति॥पारमेश्वरतंत्रे॥ईश्वरउवाच॥पश्चमास्यिमुखंलिंगंयो निरुक्तंपरिकीर्तितं॥हृद्ग्रंथेबिंदुसंयुक्तंस्वयंभूवाणवाचकं॥इतरंचांतरालस्थंवि सर्गाधस्तथापरं॥महापद्मवनंचांतयोगपीठंप्रकीर्तितं॥कंदंचगोलकाकारंतत्र कामंबिंदुरूपिणं॥ब्रह्मरंध्रंतुतत्रैवसुषुम्णाधारमंडलं॥पृथिव्यादीनिरंध्राणि सप्तानांवाचकानितु॥पूर्णाख्यंचंदनंतत्वंकोदंडद्वयमध्यगं॥तद्ऊर्ध्वनादनामा नंतेंद्रियाणांप्रकीर्तितं॥कामरूपमचेलक्तिंविसर्गमतुलंप्रिये॥बंधंतस्याःप्रवक्ष्या मिसंवित्तंलभतेयया॥आदौपूरकयोगेनह्याधारेयोजयन्मनः॥गुदमंढ्रांतरेयानि

स्तामाकुंचप्रबोधयेत्॥ भ्रूमध्यो निगतंध्यात्वाकामबंधूकसंनिभंसूर्यकोटिप्र
तीकाशंचंद्रकोटिसुशीतलं॥ तस्योर्ध्वंतुशिखासूक्ष्माविचित्रापावकीकला॥ त
यासहितमात्मानमकिंचितंविचिंतयेत्॥ गच्छं तंब्रह्ममार्गेणलिंगंयत्रक्रमेण
तु॥ अमृतंतद्विसर्गस्थंपरमानंदलक्षणं॥ हृत्तंरक्तंस्रवत्याद्यंधारापातैःप्र
वर्तितं॥ पीत्वाकुलामृतंदिव्यंपुनरेवविशेत्कुलं॥ पुनरेवाकुलंगच्छन्मात्रायोगे
ननान्यथा॥ साचप्राणःसमाख्याताअस्मिंस्तंत्रेमयोदिते॥ ऊर्ध्वंशाङ्गतिःप्रा
णान्नूध्वनिर्यसिन्प्रजायते॥ सामात्राजायतेभूयनश्चारवशवर्तिनी॥ नह्यातः
प्रोच्यतेसोपिप्राणस्तस्यशतेयदा॥ एवमभ्यस्यमानस्यअहन्यहनिनिश्चयं॥
जरामरणदुःखाद्यैर्मुच्यतेभवबंधनात्॥ चतुर्विधातुयास्रष्टिर्यस्यांयोनौप्रव
र्तते॥ पुनस्प्रलीयतेयस्यांकालाग्न्यादिशिवांतगा॥ योनिमुद्रापराह्येषाबंधःस्व
रूपाःप्रकीर्तितः॥ तस्यास्तुबंधमात्रेणतन्नास्तियन्नसाधये॥ मंत्रःकीलितास्तं
भिताश्चयेदग्धामंत्राःसितानीहीनामलिनास्तुतिरस्कृतः॥ खंडितास्त्रमयुक्ता
शक्ताःसंमूर्छितोहताः॥ मंदाबालास्तथावृद्धाःप्रौढयौवनगर्विताः॥ अरिपक्षे

स्तिंतायेचनिर्वीर्यासत्ववर्जिताः॥ तथांशकेनहीनाश्चखंडशःशतधाकृताः॥ विधि
नानेनसंयुक्ताःप्रसवत्यचिरेणतु॥ सिद्धिंमोक्षप्रदाःसर्वेगुरुणाविनियोजिताः॥
यद्यदुच्चरतेमंत्रीमंत्ररूपंशुभाशुभं॥ तत्तुसिध्यत्यनायासाद्योनिमुद्रानिबंधना
त्॥ दीक्षयित्वाविधानेनअभिषिंचेत्सहस्रधा॥ ततोमंत्राधिकारार्थमेषामुद्राप्र
कीर्तिता॥ ब्रह्महत्यासहस्राणित्रैलोक्यमपिघातयेत्॥ नासोलिप्यतिपापेनयो
निमुद्रानिबंधनात्॥ अथचक्राणिलयायोगोपयोगीनि शिवयोगेमूलाधारेत्रिधा
वर्तेब्रह्मचक्रंशशोपमंतत्कंदेग्निंसध्यायेदधश्शक्तिमभिष्टदां॥ स्वाधिष्ठानंतत
श्चक्रंतत्रचातुर्दलांबुजं॥ तदेवोड्डियानंध्यायेत्पश्चिमाभिमुखंशिवे॥ पंचावर्तना
भिचक्रंसर्पाकारंतदूर्ध्वसं॥ तत्रकुंडलिनींध्यायेदधश्शक्तिंसुसिद्धिदां॥ अधो
मुखाष्टपत्राढ्ययुक्तंहृच्चक्रमिष्टदं॥ तन्मध्यकर्णिकांध्यायेत्सूर्यातिर्लिंगाकृतिंलि
मां॥ पंचमंकंठचक्रंचतत्रांगुलचतुर्थके॥ इडापिंगलयोर्ध्यायेत्सुषुम्णांमध्यसंस्थि
तां॥ षष्ठंचघंटिकालिंगंमूलंतद्राजदंतकं॥ ध्यायेत्तदूर्ध्वमहारंतत्रभ्रूमंसुसिद्धयं॥
स्रूचक्रंसप्तमंत्वेकनालकंदंसकुप्रदं॥ ध्यायेद्दिव्यंशिखाकारंतन्मध्येज्ञानलोचनं॥

ब्रह्मरंध्रेषमंचक्रंनिर्वाणाख्यंसुसूक्ष्मदं ॥ तत्रज्ञालंधरंध्यायेत्धूम्रंमोक्षपदंततः ॥
आज्ञाबीजंनवमंप्रज्ञास्तंत्रिकूटकंपूर्णगिरेश्चपृष्ठे ॥ तत्रोर्ध्वशक्तिंशुभदांसुशून्यां
ध्यायेच्चसाष्टारसरोजमध्येति ॥ शास्त्रांतरेतु ॥ प्रथमंब्रह्मचक्रंस्यात्त्रिरावृत्तस
गाकृति ॥ अपानेमूलकंदाख्यंकामरूपंचतज्ज्ञगुः ॥ तदेववह्निकुंडंस्यात्तत्रकुंड
लिनीस्थिता ॥ तांजीवरूपिणींध्यायेज्योतिष्कामुक्तिहेतवे ॥ स्वाधिष्ठानंद्वितीयं
यस्याच्चक्रंतन्मध्यगंविदुः ॥ पश्चिमाभिमुखंलिंगंप्रवालांकुरसंनिभं ॥ ततोद्वि
याणपीठेतुतंध्यात्वाकर्षयेद्ज्ञगत् ॥ तृतीयंनाभिचक्रंस्यात्तन्मध्येसुजमीस्थि
ता ॥ पंचावर्तामध्यशक्तिश्चिद्रूपाविद्युदाकृतिः ॥ तांध्यात्वासर्वसिद्धीनांभा
जनंजायतेबुधः ॥ चतुर्थेहृदयेचक्रंविज्ञेयंतदधोमुखं ॥ ज्योतिरूपंसंध्यायेत्प्रय
त्नतः ॥ तंध्यायतोज्ञगत्सर्वंवश्यंस्यान्नात्रसंशयः ॥ पंचमंकंठचक्रंस्या
त्तत्रवामेइडाभवेत् ॥ दक्षिणेपिंगलाज्ञेयासुषुम्णामध्यतस्थिता ॥ तत्रध्यात्वाशु
चिर्ज्योतिःसिद्धीनांभाजनंभवेत् ॥ षष्ठंचतालुकाचक्रंघटिकास्थानमुच्यते ॥ दश
महारमार्गंतद्राजदंतंचज्ञगुः ॥ तत्रशून्यत्रयंध्यात्वामृतासवतिनिश्चितं ॥ भ्रूचक्रं

सप्तमंविद्धिबिंदुस्थानंचतज्ज्ञगुः ॥ भ्रुवोर्मध्येवर्तुलंचध्यात्वाज्योतिःप्रमुच्यते ॥ अष्ट
मंब्रह्मरंध्रंस्यात्परंनिर्वाणसूचकं ॥ तंध्यात्वासूचिकाग्रांधूमाकारंविमुच्यते ॥ तज्ज्ञ
नालंपरंज्ञेयंमोक्षदंलीनचेतसां ॥ नवमंव्योमचक्रंस्याद्दलैःषोडशभिर्युतं ॥ सचिद्रू
पाचत्तन्मध्येशक्तिरूर्ध्वस्थितापरा ॥ तत्रपूर्णगिरौपीठेशक्तिंध्यात्वाविमुच्यते ॥ ऊर्ध्व
शक्तिनिपातेनअधःशक्तेर्निकुंचनात् ॥ मध्यशक्तिप्रबोधेनजायतेपरमंसुखमिति ॥
एतत्सलंत्रिपुरासारसमुच्चयेविस्तरेणोक्तं ॥ तथाहि ॥ अथाधारपंकेरुहान्पत्रवद्भ्यसु
षुम्णांतरस्थानिसंक्षेपतोहं ॥ तदंभोजपत्रस्थितांश्चापिदेवांस्तदंभोजवर्णांस्तदाधा
रदेवीः ॥ अजस्रंथिपद्मंपुरायन्मयोक्तंतदाधारमाद्यंवदंतीहसंतः ॥ सुवर्णाभवर्णै
श्चतुर्भिःसमेतंदलैर्योगिगम्यंमहाश्चर्यभूतं ॥ चतुर्ब्रह्मपत्रेषुदेवीनिरुत्थानज्ञलाणी
दिवर्णान्यसत्केवलात्वा ॥ सबिंदूनबिंदुप्रभावान्समित्थान्स्फुरत्योतिषोडाकिनीदेव
तान्न ॥ मूलाधारेसततंध्याननयोगात्तत्तंभस्तोभावुल्लसिर्दादुरीव ॥ भ्रमित्या[illegible]गः स्वच
रत्वंक्रमेणान्नृणामेतत्सद्गुणाःसंभवंति ॥ कांतिप्रकर्षोवपुषोपिनाद्यव्यक्तिःप्रदाग्निर्ज
ठरानलस्य ॥ लघुत्वमंगस्यनिजेंद्रियाणांपटुत्वमारोग्यमदीनताच ॥ कलामनोनिश्च

लमत्रमूलचक्रेनराः संतनमादरेण॥ उक्तंसवत्रापिभविष्यदर्थेवदंतिशास्त्राण्यृषि
चाश्रुतानि॥ विहायसद्यःकमलासनस्यवक्त्रांबुजंप्रीतितरंगसंगात्॥ तदीयवक्त्रांबु
सरोरुहंतेसरस्वतीन्दत्यति दिव्यनूपिणि॥ अधिगम्यरसद्रमंत्रसिद्धीरयिकालचवि
जित्यरिदुर्निवारं॥ अजरामरतामवाप्यचांतेपरमानंदपदमुदारमंते॥ एकीभूतार्णी
वांसःप्लुतमखिलजगपूर्वमासीदपूर्वज्योतिर्मूर्तीस्तदंतर्हितमहिमभूलिंगरूपी
बभूव॥ षट्सिद्धाधिष्ठितोत्मासकलसुरनुतःषड्विरास्येरुपेतःषड्भिःकोशैश्चदेवांस
वशयतिमिरध्वंसहंसोमहेशः॥ अंगेलिंगंवपुभृतांभगवतादेवाहिरंडासवद्वालीपू
र्वमुरवंशिवस्यतुमकाकालस्तथोर्धाननं॥ वक्त्रंदक्षिणमाशुश्रोणिमिरमोदेवःपिना
कीपुनःपाश्चात्यंछगलंडएषभगवानवामास्यमस्यासवत्॥ स्वाधिष्ठानसमाह्वयंर
सदलैर्मूलेर्ध्वजस्याबुजंबालादित्यनिषंदलोपरिगतैःपृष्टादितर्कक्षरैः॥ बिंदूच्चा
सितमस्तकेभगवतोलिंगात्मनःशूलिनःस्थानंयोगिवरेणगोचरमिदंचास्याचिंत्या
नाकिनी॥ इहस्वाधिष्ठानेनिहितनिजचेतोलयवशादमंदानंदोघस्तिमितहृदयःसा
धकवरः॥ समेतांगोनेगःक्षितितलगतोवाप्तगदशा॥ स्मरस्मेरापांगंरमयतिगणंकांति

MEMORIAL

तिकलितं॥ इहवन्हिनिधायमानसंस्वविधेनाश्रुतशास्त्रजालमुच्चैः अवधूतजरा
मयःसमर्त्यःसुचिरंजीवतिवीतमृत्युभीतिःवपुषोशुचिभाजनस्यशश्वत्परमाशु
स्विमिहातनोतिपुंसां॥ शरदंबुदधवलस्यदेहेदढरुत्योघनतांचशीतरश्मिः चलितंस त
